# संस्कृत-वार्ता:

दिनाङ्क : 25/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी भारत-इज्रैल-देशयोः मध्ये पारस्परिकसहयोगसमीक्षायै इज्रैलदेशस्य द्विदिवसीयायां यात्रायाम् अद्य अपराह्ने तेल-अवीव इत्यत्र सम्प्राप्तवान्।
- निर्वाचन-आयोगेन पश्चिमबङ्गाले विधानसभा-निर्वाचनात् पूर्वं नियुक्तानां केन्द्रीय-सशस्त्र-आरक्षक-बलस्य कर्मचारिणां कृते सुनिश्चितेषु वाहनेषु जी. पी. एस्.- इति निरीक्षणिका योजयितुं निर्णयः कृतः अस्ति।
- विदेशसचिवः विक्रममिस्री इत्यसौ वर्धमान-वैश्विक-अनिश्चिततायाः मध्ये सामरिक-स्थिरतायाः संरक्षणस्य तथा नवीकृत-शस्त्र-स्पर्धायाः निवारणस्य च अत्यावश्यकतायाः विषये भारतस्य दायित्वं प्रत्यपादयत्।
- आई. सी. सी. इति पुरुषवर्गीयायां विंशति-प्रतिविंशति-क्रिकेट-विश्वचषक-क्रीडायां अद्य सायं कोलम्बो-नगरे उत्तमाष्टस्पर्धायाः द्वितीयवर्गे न्यूजीलैण्ड-दलं श्रीलङ्कादलेन सह क्रीडिष्यति।

------------------------------------------

<u>प्रधानमन्त्री-इज्रैलयात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी इज़्रैलदेशस्य द्विदिवसीयायै यात्रायै अद्य अपराह्ने तेल-अवीव इत्यत्र सम्प्राप्तवान्। तस्य इयम् इज्रैलदेशस्य द्वितीययात्रा अस्ति। यात्रावधौ प्रधानमन्त्री नरेन्द्रमोदी, तस्य समकक्षीयः बेजमिन-नेतन्याहू च भारत-इज़्रैल-रणनीतिक-सहयोगे जातायाः महत्वपूर्णप्रगतेः समीक्षां करिष्यतः। तौ विज्ञान-प्रौद्योगिकी-नवाचार-रक्षा-सुरक्षा-कृषि-जलप्रबंधन-व्यापारार्थव्यवस्था-परस्परादानप्रदानादिक्षेत्राणां सहयोगस्य विभिन्नक्षेत्रेषु आगामि-अवसरान् अधिकृत्य चर्चिष्यतः। द्वावेव नेतारौ परस्परहितानां क्षेत्रियेषु वैश्विकेषु च

प्रकरणेषु स्वविचारान् प्रदातुं शक्नुतः। स्वकीयायाः यात्रायाः पूर्वं. प्रधानमन्त्रिणा आशा प्रकटिता यत् तस्य द्विदिवसीया इयं यात्रा द्वयोः देशयोरमध्ये सम्बन्धान् इतः अपि सुदृढान् करिष्यति। यात्रापूर्वं स्वकीये प्रस्थानवक्तव्ये प्रधानमन्त्रिणा प्रोक्तं यत् अनया यात्रया रणनीतिकसहयोगाय नूतनलक्ष्याणि निर्धारितानि भविष्यन्ति सहैव द्वयोः देशयोः समृद्धभविष्याय संयुक्तदृष्टिकोणं च अग्रे नेष्यते। सः प्रोक्तवान् यत् भारत-इज़्रैलदेशौ सुदृढरणनीतिकसहयोगस्य विनिमयं कुरुतः यस्मिन् विगतेषु केषुचिद्वर्षेषु उल्लेखनीया वृद्धिः गतिशीलता च सञ्जाता अस्ति।

------------------------------------------

## इज़्रैलराष्ट्रपतिः-मोदी

इज़्रैलदेशस्य राष्ट्रपतिः इसहाक-हर्ज़ोग इत्यसौ अकथयत् यत् तस्य देशः देशवासिनः च प्रधानमन्त्रिणः नरेन्द्रमोदिनः स्वागतं कर्तुं समुत्सुकाः सन्ति। श्रीहर्ज़ोगः इत्यस्य वक्तव्यं प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रस्थानवक्तव्यस्य प्रत्युत्तरे समागच्छत् यस्मिन् सः उल्लेखम् अकरोत् यत् स्वकीयेन इज़्रैल-समकक्षीयेण बेंजामिन-नेतन्याहू इत्यनेन सह स्वकीयानां व्यस्ततानां प्रतीक्षां कुर्वन् अस्ति। इतः पूर्वं रविवासरं एकस्मिन् सार्वजनिक-सञ्जीलीय-संदेशे , इज़्रैलदेशस्य प्रधानमन्त्री बेंजामिन-नेतन्याहू इत्यसौ भारत-इज़्रैलदेशयोः मैत्रीबलं रेखांकितं कुर्वन् प्रधानमन्त्रिणः नरेन्द्रमोदिनः आगमनम् ऐतिहासिकक्षणम् इति प्रत्यपादयत्।

------------------------------------------

## निर्वाचनायोगः-ट्रैकर्स्

भारतस्य निर्वाचन-आयोगेन पश्चिमबङ्गाले विधानसभा-निर्वाचनात् पूर्वं नियुक्तानां केन्द्रीय-सशस्त्र-आरक्षक-बलस्य कर्मचारिणां कृते सुनिश्चितेषु वाहनेषु जी. पी. एस्.- इति निरीक्षणिका योजयितुं निर्णयः कृतः अस्ति। सी. ए. पी. एफ्. इति आरक्षिबलानां नियोजनं द्वयोः चरणयोः आरभ्यते। अग्रिममासस्य प्रथमदिनात् चत्वारिंशदधिक-द्विशतं संख्याकानां आरक्षिदलानां प्रथम-चरणस्य नियोजनं भविष्यति। आयोगेन निर्देशः दत्तः यत् सशस्त्रसेनाः क्षेत्र-आधिपत्यस्य अभ्यासं करिष्यन्ति, राज्यस्य भौगोलिकस्थित्या च परिचिताः भविष्यन्ति। पश्चिमबङ्ग-राज्यस्य मुख्य-

निर्वाचन-अधिकारी अवदत् यत् जी. पी. एस्.-निरीक्षण-व्यवस्थया निर्वाचन-आयोगेन नियुक्ताः केन्द्रीय-निरीक्षकाः सी. ए. पी. एफ्.इत्यस्य कार्मिकानां सञ्चारस्य निरीक्षणं कर्तुं समर्थाः भविष्यन्ति। द्वितीय-चरणस्य चत्वारिंशदधिक-द्विशतं संख्याकानि आरक्षिदलानि मार्च-मासस्य दश-दिनाङ्कात् आरभ्य नियोजितानि भविष्यन्ति।

-------------------------------------------

## निरस्त्रीकरणम्

वर्धमान-वैश्विक-अनिश्चिततायाः मध्ये सामरिक-स्थिरतायाः संरक्षणस्य तथा नवीकृत-शस्त्र-स्पर्धायाः निवारणस्य च अत्यावश्यकतायाः विषये भारतम् अवधानम् अकरोत्। जिनेवा-नगरे निरस्त्रीकरण-सम्मेलनस्य उच्च-स्तरीय-खण्डं सम्बोधयन्, विदेशसचिवः विक्रममिस्त्री, सैन्य-कृत्रिम-बुद्धिचातुर्यस्य दायित्वपूर्ण-उपयोगाय देशस्य प्रतिबद्धतां, रक्षाक्षेत्रे विश्वसनीयस्य ए. आई. इत्यस्य मूल्याङ्कनाय राष्ट्रिय-संरचनां च अधोरेखितवान्। सद्यः एव न्यू स्ट्रेटेजिक् आर्म्स् रिडक्षन् ट्रीटी अथवा न्यू स्टार्ट् इत्यस्य समाप्तिः, वैश्विकशस्त्रनियन्त्रणस्य कृते प्रमुखा हानिः अस्ति। सः विनाशकारि-शस्त्रैः सह वर्धमानस्य आतङ्कवादस्य सङ्कट-विषये अपि अकथयत्। सः इत्यपि अवदत् यत् भारतं विश्वसिति यत् विश्वसुरक्षायाः कृते सामरिकस्थिरतायाः रक्षणं, शस्त्रस्पर्धायाः निवारणं च पूर्वकालात् अधिकम् महत्त्वपूर्णम् अस्ति।

-------------------------------------------

## राष्ट्रपतिः-आरोग्यमेलकम्

राष्ट्रपतिः द्रौपदीमुर्मु-वर्यया अद्य महाराष्ट्रस्य विदर्भक्षेत्रस्य बुल्दाना-मण्डलस्य शेगाव-नगरे चतुर्दिवसात्मकं राष्ट्रिय-आरोग्य-मेलकम् उद्घाटितम्। अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत्, स्वस्थ-नागरिकाः स्वस्थ-राष्ट्रस्य निर्माणे प्रमुखां भूमिकां निर्वहन्ति। सा अवोचत् यत्, औषधीय-सस्य-कृषिः कृषकाणां आर्थिकस्थितिं वर्धयति, मृत्तिकायाः स्वास्थ्यं च वर्धयति।

ध्यानास्पदं वर्तते यत् आयुष्-मन्त्रालयः अखिलभारतीय-आयुर्वेद-काङ्ग्रेस्-सङ्घस्य सहयोगेन राष्ट्रिय-आरोग्य-मेलकम् आयोजयति।

------------------------------------------

## शिवराज-मेलकम्

कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह-चौहानः अद्य नवदिल्ल्यां पूसा-कृषि-विज्ञान-मेलकस्य उद्घाटनम् अकरोत्। अस्मिन् अवसरे श्रीचौहानः अवदत् यत्, सर्वकारः उर्वरकाणां सौलभ्यं सुदृढं कुर्वन् अस्ति, अनुत्तम-कीटनाशकानां विक्रयणं च निवारयति सहैव कृषकाणां ऋणं सुव्यवस्थितं कर्तुं शीघ्रमेव फार्मर-आई डी इति कृषकपरिचयपत्रम् अपि प्रवर्तयिष्यति । सः उल्लेखितवान् यत् प्रधानमन्त्री-फसल-बीमा-योजनायाःअन्तर्गतं कृषकाणां कृते प्रायः एकलक्षं द्विनवति-सहस्रकोटि-रूप्यकाणां वितरणम् अभवत्। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्र-मोदी-वर्यस्य नेतृत्वे अनेकानि परिहारकार्याणि कार्यान्वितानि सन्ति, तेषाम् परिणामेन, भारतं इदानीं तण्डुल-उत्पादने विश्वे प्रथमस्थानम् भजति।

------------------------------------------

## रिजीजू

अल्पसङ्ख्यककार्यमन्त्री किरेन-रिजीजू अवदत् यत् दिल्ल्यारक्षिबलैः नवदिल्ल्याम् अरुणाचलप्रदेशस्य तिसृणां महिलानाम् अपमानम् कुर्वाणः अभियुक्तः निगडितः। अद्य प्रातः प्रसारमाध्यमैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत् विधिना कठोरं कार्याचरणम् आचरिष्यते। सः इत्यपि अवदत् यत्, यदि कश्चित् पूर्वोत्तरराज्याणां जनैः सह दुर्व्यवहारं करोति तर्हि तं विरुद्धं प्रबलं कार्याचरणं विधास्यते इति सर्वकारेण सुनिश्चितं कृतम् अस्ति ।

------------------------------------------

## आईसीसी-क्रिकेटविश्वचषकः

आई. सी. सी. इति पुरुषवर्गीयायां विंशति-प्रतिविंशति-क्रिकेट-विश्वचषक-क्रीडायां अद्य सायं कोलम्बो-नगरस्य आर्. प्रेमदासा-क्रीडाङ्गणे उत्तमाष्टस्पर्धायाः द्वितीयवर्गे न्यूजीलैण्ड-दलं श्रीलङ्कादलेन सह क्रीडिष्यति। क्रीडास्पर्धा सायं सप्तवादने आरप्स्यते। पूर्वं गतरात्रौ

श्रीलङ्कादेशस्य पल्लेकेले-अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे उत्तमाष्टस्पर्धायाः द्वितीयवर्गे इङ्ग्लैण्डदलेन पाकिस्तानः क्रीडकद्वयस्य हानौ पराजितः।

**।। इति वार्ता: ।।**